रा.सं.ह.क्र.१३

जैन-धार्मिक

क्र.नं.८६

संस्कृत

बीजोध्दार कोश

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

# बीजकोश

॥श्री काशी। विश्वनाथपुरीमे ढुंढिराजगणेशके पाश दाऊ अग्निहोत्रीके यहाँ
सिद्धविनायकयंत्रमें बिजोद्धारकोश छापागया जिसे लेना होय उसे ढुंढिरा
जगणेशके पाश दाऊ अग्निहोत्री छापावालेकी दुकानपर मिलैगी। धुरविन्
छा० लि० विशेशर उपाध्या० संवत १९२४ मी० चैत्रशुक्ल १२ चंद्रे० ॥

Sanshodhan Mandal, Dhule and the

वी॥श्रीगणेशायनमः॥ ॥श्रीएकदास्फाटिकोर्वीभृत्सानौवनसमाकुले संस्थितौपार्वतीशंभूलोकरक्षणतत्परौ पार्वतीपरमेश्व
१ रंप्रोवाचवचनंहितम् पार्वत्युवाच॰ देवदेवस्मरश्रेष्ठदयात्रैगुण्यमानस देवीभगवतीदेवमहात्रिपुरसुंदरी अस्मिंश्वराचलेव्य
क्तरूपेकेनप्रकाशिता २ ईश्वरउ॰ शृणुदेविप्रवक्ष्यामिरहस्यंत्वत्कुतूहलात् ३ रेवातटेमहापुण्येश्रीगर्भानामसत्पुरी अस्मिंस्त्रै
लोक्यविख्यातासर्वभूतलशेखरा ४ तस्यांबभूवविप्रेंद्रदेवगंधर्वसेवितं पुण्यंतपोवनपदंनामावृक्षसमाकुलम् ६ तस्मिंस्त
पोवनेपुण्येसेवितेपिमुनीश्वरैः ऋषिःस्याद्दक्षिणामूर्तिस्तदाराधनतत्परः ७ नानाशास्त्राब्धिपूतोभूत्सर्वागमनिधिःशिवे एक
दास्नातुमायातोरेवांपुण्यजलान्विताम् ८ प्राक्पुण्यकर्मणातस्मै तुष्टात्रिपुरसुंदरी जलमध्येस्थितागोप्त्रीमहात्रिपुरसुंदरी॰
९ स्वमूलंशिक्षितंदेव्याशुद्धामृतमयात्मकम् सत्वरंफलदंगोप्यंसमुनींद्रशिरोमणिः १० तदाप्रभृतितन्मंत्रंध्यायन्देवि
जपन्हृदि तत्प्रभावान्महादेविनिर्णयंकर्तुमशेषतः ११ तत्क्षणमात्रेणसमुनिःपरपूजितः ग्रंथमुद्धारकोशाख्यंचकारसनु
सागरम् १२ अस्यान्नानाविधांस्तंत्रान्दृष्ट्वात्रैलोक्यपूजिते तदाप्रभृतिदेवेशिप्रसिद्धंभूमिमंडले १३ तंत्रमुद्धारकोशाख्यं

2A

सर्वागमविनिश्चितं देव्युवाच देवदेवजगन्नाथभक्तानुग्रहकारक श्रोतुमुद्धारकोशाख्यंतंत्रमागमनिश्चितं १५ इच्छामिपरम।
मीत्यावक्तुमर्हसिधूर्जटे ईश्वरउवाच॰ शृणुपार्वतिवक्ष्यामित्युद्धारंत्रिपुरार्दितः १६ देवीनांदशविद्यानांमंत्रोद्धारमनुत्तमम्
तंत्रमुद्धारकोशाख्यंसर्वागमविनिश्चितं १७ सर्वग्रंथ्यादिपूज्यंच तच्छृणुष्वब्रवीम्यहम् तदनुग्रहमात्रेणसर्वानुद्धारसंचया
न् १८ ग्यब्रवीद्दक्षिणामूर्तिश्छात्रमज्ञोभ्यनामकं शृणुछात्रमहाभागदेवीभक्तिसमन्वितः १९ रहस्यंसर्वलोकानांदेवानाम
पिदुर्लभं ईश्वरउ॰ देवितस्मिन्नवसरेशिष्यायप्रियवादिने २० मुनीन्द्रोदक्षिणामूर्तिरब्रवीद्धृष्यमुत्तमम् भाषितंयत्पुरातेनन
त्प्रभावान्महेश्वरि २१ देवीनांदेवतानांचतच्छृणुष्वब्रवीम्यहम् ॐ त्रिपुरस्कंदर्यैनमः ईश्वरउ॰ अत्रादौत्रिपुरसुंदरीमंत्रोद्धा
रः उक्तंचरुद्रयामले ॐ लक्ष्मीःपरमदनवाग्भवकामशक्तिस्तारंचभूतिकमलाकथितापिविद्या शक्त्यादिकंतुविपरीततया
चप्रोक्ताश्रीषोडशाक्षरविधिःशुभमस्तुपूर्णा २२ उड्डामरेच द्वीपेदसंभवाभूतिःकामंवाग्भवमेवच शक्तिःप्रणवलज्जेपिल
क्ष्मीःशक्त्यादिकंततः २३ विपरीततयाप्रोक्ताविद्याश्रीषोडशाक्षरी। वामकेश्वरेपि हरिणाक्षीतथामायाकामोभामिनि॰

3

वी-वासना २४ शरच्चन्द्रंतथात्तामालक्ष्मीःशक्त्यादिकंततः विपरीततत्पाप्रोक्ताविद्याश्रीषोडशाक्षरी २५ अस्योद्धारस्यवक्ष्या
२ मिकोशानिहितकाम्यया जगतांसाधकानांचरहस्यंत्रिदिवौकसां २६ अथलक्ष्मीबीजोद्धाराणि उक्तंचछिन्नारहस्ये ॥
लक्ष्मीपद्माहरिणाक्षीसरोरुहनिवासीनी २७ कमलारुक्मिणीचैवनारायणप्रियापिच लक्ष्मीबीजानिसप्तैवकृत्रिमाण्य
पराणिच २८ त्रिपुरातिलके इमेहेकमलापद्माहरिकांतातथैवच श्रियोबीजानियंचैवकृत्रिमाण्यपराणिच २९ अथह्रींबी
जोद्धाराणि उक्तंचागमालंकारे परभूतिस्तथालज्जामायापिसकलाकृशा समस्तापितथाक्षामाकृत्रिमाण्यपराणिच ३०
ततोमदनबीजानि उक्तंचभैरवतंत्रे कामःपंचेषुरेवंचमदनोमन्मथस्तथा मारःप्रद्युम्नकंदर्पावनंतान्यपराणिच ३१ ततोवा
ग्भवबीजानि उक्तंचत्रिपुरासर्वस्वे वाग्भवमूर्द्धबीजंचचारणंचंडिकेश्वरः ३२ चंद्रोपिचर्मवसनंवासनापितथैवच चार्वो
ण्यपिचचर्माणंवासस्यान्यपराणिच ३३ ततःशक्तिबीजानि उक्तंच छिन्नाशिरोमणौ शक्तिःकर्मापिविज्ञेयेशास्यांके तथै
वच शक्तेर्बीजानिचत्वारिकृत्रिमाण्यपराणिच ३४ ततः ॐकारबीजानि प्रणवंच्चतत स्तारंच्यक्षंतोमपिव्यंबकः त्रासः

3A

ताख्यएतानिबीजानिप्रणवस्यच ३५ अपराणिहसस्यानिमयाप्रोक्तानिपार्वति विपरीततयाप्रोक्ताविद्याश्रीषोडशाक्ष
री ३६ प्रकाशम् श्रींह्रींक्लींऐंसौः ॐह्रींश्रींक्लींसंक्लींसौः ऐंक्लींह्रींश्रीं इतिमूलम् इतित्रिपुरसुंदरीमंत्रोद्धारकोश
नि अथाहंदशविद्यानांमंत्रोद्धारंब्रवीम्यहम् ३७ ३८ आगमार्णवरत्नेस्मिंस्तंत्रेवैरुद्रयामले उक्तंचागमलहर्यां अथ
दशविद्या ॐत्रिपुराश्रीश्चवाग्देवीताराधिभुवनेश्वरी ४० मातंगीशारिकाराज्ञीभीडाज्वालामुखीतथा दशविद्यास्वयं
चेताभाषिताःकृत्तिवाससा एतादशैवषडन्यायोजिताषोडशाक्षरी ४१ दशविद्याभद्रकालीतुरीवछिन्नमस्तिकाम् दक्षि
णाकालिकाश्यामाकालरात्र्यपिसुंदरि ४२ एतासांमूलमंत्रेणयोजितेकाक्षरेणच ब्रह्मादिदेवतैःपूज्याश्रीविद्याषोडशाक्ष
री ततोलक्ष्मीमंत्रोद्धारः उक्तंचरुद्रयामले० हरिणाक्षीपराख्यंवलक्ष्म्याबीजत्रयंस्मृतं ४४ विपरीततयाजाप्यंसत्वरंफल
दायकं त्वमाशंकापिनोरंतुबांतेप्रोक्तंशिष्यातम ४५ ॐततःस्वहाबीजानि उक्तंचोड्डामरे आपोषनंतथानीरंडहूयंचप
यस्तथा ४६ जलेबीजानिप्रोक्तानिषडक्षस्याम्यन्यानिच प्रकाशं ॐह्रींश्रींलक्ष्मिमहालक्ष्मिसर्वकामप्रदेसर्वसौभाग्यदा

पी॰पिनिअभिमतंप्रयच्छसर्वेसर्वगतेसुरूपेसर्वदुर्जयविमोचिनिह्रींसःस्वाहा इतिमूलं ततः सरस्वतीमंत्रोद्धारः उक्तंचशारदा
३ पटले तारंलज्जांवाग्भवंचपराप्रणवमेवच बीजंपंचशिरोज्ञेयंमंत्रज्ञैर्योनमइति अथनमोबीजानि उक्तंचागमालंकरणे॰
नमोविश्वंस्तथास्तंभंचोष्मकंचाप्मरीतथा ४९ अन्यानिहृतिमान्येवंसुरासुरनमस्कृते प्रकाशम् ॐह्रींऐंह्रींसरस्वत्यै
नमः ततः स्त्रामंत्रोद्धारः उक्तंचभैरवसर्वस्वे तारंव्योमंतथाकोंतामायावाग्भवमेवच ५१ कूर्चंचैवमहेशानिह्यंतेफट्
द्वयंतथा ततोह्रूंबीजोद्धाराणि उक्तंचागमसिंधौ स्कंदंव्योमषष्ठविंवंचसंयोज्यहरमिस्ततः ह्रूंबीजोद्धारमेतद्धिचान्यदन्यत्
कंवदेत् ५३ ततः स्त्रीबीजोद्धाराणि॰ वामकेश्वरे कान्ताचकमलाक्षीचप्रियापिपरमापिच॥लंबापिल्ललनालाजाह्न।
त्रिमारयपराणिच ५४ ततः कूर्चबीजोद्धाराणि छिन्नारहस्ये कूर्चंकूलंतटंतीरंवासत्यान्यपराणिच ततः फट्बीजानि
अस्मिन्नेव फट्हरंतुरगंवान्यसस्त्रंतुस्करेश्वरि प्रकाशं ॐह्रूंस्त्रींह्रूंऐंहूंउग्रतारेफट्स्वाहा ततोभुवनेश्वरीमंत्रोद्धा
रः उक्तंचकुब्जिकासर्वस्वे प्रणवंचतथामायाकमलामन्मथस्तथा ५७ अंतेविश्वंमहेशानिनाममध्येसुरेश्वरि प्रोक्तोयं

4A

भुवनेश्वर्य्यामनुश्चैकादशाक्षरः ५९ प्रथमंतुबीजानि उक्तंचत्रिपुरार्टीकायां मंत्रोमनुर्हरश्चैवंहनुर्वालंबिदुर्बुधाः ९०
बीजान्येतानिमंत्रस्यकृत्रिमाण्यपराणिच प्रकाशं ॐ ह्रींश्रींक्लींभुवनेश्वर्यैनमः ततोमातंगीमंत्रोद्धारः उक्तंचकूलसिद्धसंताने ततोमाकाली
तथालक्ष्मीर्बागुराद्वयमेवच ९२ चारुकंरसबीजानिवादौप्रोक्तानिशंभुना ॥ अंतेजिह्वातथापद्मंलज्जानीरजमेवच
९३ वासनापंकजंचैववनंप्रोक्तंचशूलिना अथकालीबीजानि कुलचूडामणौ कालीकुंनीरसज्ञापि जिह्वापिरसना
तथा ९४ क्लींबीजानितथैतानिकृत्रिमाण्यपराणिच अथवागुराबीजोद्धाराणि बागुराबायुपूज्यापिवांतदापित्रि
बीजकं ९५ श्रींबीजानिशिवेत्रीणिकृत्रिमाण्यपराणिच अथवारुकबीजानि० मुंडमालातंत्रे चारुकंचैववर्वागो
वारुतोद्धूनबीजकं ९६ चतुष्टयंचक्रौंबीजमस्यस्यपराणिच ततःपद्मबीजोद्धाराणि वामकेश्वरे पद्मःपंकजं
पयोजोनीरजंचाम्बुजंतथा ९७ पंचउकारबीजानिकृत्रिमाण्यपराणिच प्रकाशम् ॐ क्रौंश्रींप्रींक्ष्रींउच्छिष्टचांडालि
निदेविमहापिशाचिनिमातंगिनिदेवि क्रौंठःह्रौंठःऐंवःस्वाहा इतिमातंगीमूलम् अथशारिकामंत्रोद्धारः उक्तंच०

5

वी स्वकृतौत्रिपुरशिरोमणौ। तारंमायांश्रियंकूर्चंसिंधुरंशत्वमेवच ६९ कल्यानंशारिकादेव्याबीजंसप्तात्तरंस्मृतं अंतेस्तं
४ भंचविज्ञेयंशारिकामूलमुत्तमं ७० ततः सिंधुरबीजोद्धाराणि उक्तंचवामकेश्वरे० सिंधुरंचगजंघोराहस्तंचद्विरदंतथा
मुंबीजानिचचत्वारिकृत्रिमाण्यपराणिच ततः आकाशबीजोद्धारः उक्तंचभैरवतंत्रे शून्यंखभांवरंव्योमभ्रांबीजंचचतु
ष्टयम् ७२ हकारंचैवविज्ञेयमित्युक्तंरुद्रयामले॥ असत्यमपरंज्ञेयंतारभक्तिसमन्वितं ततःकल्याणबीजानि अस्मि
न्नेव० कल्याणंचैवशर्मापिशंभुभंचचतुष्टयम् अन्तेचापरंज्ञेयंपर्वतेश्वरनंदिनि शर्मबीजोसौः शंच प्रकाशं ॐह्रीं
श्रींहूं धुंभ्रांशंशारिकायैनमः इतिमूलम् अथराज्ञीमंत्रोद्धारः तारंलज्जांश्रियंचाग्निःकामंशक्तिःषडक्षरः बीजं
चषड्विराज्ञेयंततःपद्मवसुद्वरेत ७६ भगवत्यैततोराज्ञैयन्ततेमायाद्वठद्वयं एभिःसहमनुःप्रोक्तोमंत्रःपंचदशा०
क्षरः ७७ ततोऽग्निबीजानि० अग्नीरेफश्चवह्निश्चहुतभुक्हव्यवाहनः रंबीजोद्धारमेततुकृत्रिमंचापरंस्मृतं ७८॥
प्रकाशं ॐह्रींश्रींरंक्लींसौःभगवत्यैराज्ञैह्रींस्वाहा इतिमूलम् इतिश्यामातंत्रे अथभीडामंत्रोद्धारः उक्तंच

515

कूलचूडामणौ प्रणवंचविभूतिश्चहरिकांतातथैवच विपक्षत्रयाग्नि बीजानिसंयोज्यवाग्भवंततः ८० मदनंचतत-
श्चांकाबीजंसप्तास्वरंवदेत् ढहूपेनसमायुक्तः प्रोक्तोविंशाक्षरोमनुः ८१ प्रकाशं ॐ ह्रीं श्रीं ह्स्रैं ऐं क्लीं सौः श्रीडाभ
गवतिहंसरूपिणिस्वाहा इतिमूलं अथज्वालामुखीमंत्रोद्धारः शारदाटीकायां तारंलज्जाश्रियंचैवमंतेकूर्चेहरं
पयः बीजंचत्र्यक्षरंदेव्याज्वालामुख्याःस्मरेश्वरि ८३ प्रकाशं ॐ ह्रीं श्रीं ज्वालामुखिममसर्वशत्रून्भक्षयभक्षय
हूंफट्स्वाहा॥ इतिमूलं॥ दक्षिणामूर्तिः दशविद्यामयाप्रोक्तायथागमविनिश्चिता ८५ साधकेष्टप्रदादेव्यानाना
नारत्नविभूषिताः एतासांदशविद्यानांगुणान्वक्ष्यामितत्वतः ८६ दक्षिणामूर्तिः भुक्तिंददातित्रिपुरालक्ष्मी
लक्ष्मीददातिच विद्यांददातिवाग्देवीजन्मजन्मांतरेप्यपि ८७ मातंगीभूतयक्षादिभीतिंहरतिसर्वतः शारिका
शंददात्येवराज्ञीराज्यंप्रयच्छति ८८ ददातिसंततिंभीडाधनंज्वालामुखीतथा दशविद्याःसदाभक्त्याभक्तेभ्योव
रमीप्सितं ८९ प्रयच्छंतिमहादेवि पूजाहोमजपादिभिः॥ इतिश्रीदक्षिणामूर्तिमुनिविरचितेउद्धारकोशतंत्रेद

6

बी॰ शविद्यामंत्रोद्धारकोशेगुणाख्याननामप्रथमःकल्पः ॥१॥ ईश्वरउवाच शृणुदेविप्रवक्ष्यामित्रिपुरांप्रभिवारितां
५ षट्सखीभिरहंतासांमंत्रोद्धारंब्रवीमिते १ अक्षोभ्यः गुरोविद्यात्रिसंभूतनानाशास्त्रविचक्षण श्रो तुमिच्छाम्यहं
सर्वान्मंत्रांश्चब्रह्मसिद्धये २ दक्षिणामूर्त्तिः शृणुक्षोभ्यमहाभागसर्वंवक्ष्यामितत्त्वतः दशविद्याभद्रकालीतुरीचछि
न्नमस्तिका ३ दक्षिणाकालिकाश्यामाकालरात्र्यपिसुंदरि षट्सखीनामहंतासांमंत्रोद्धारान्ब्रवीमिते ४ तंत्रा
दौभद्रकालीमंत्रोद्धारः उक्तंचश्यामातंत्रे कालीत्रयंकूर्चयुग्मंलज्जायुग्मंचभद्रिका भद्रकालिपदंब्रूयाद्वीजा
निप्रतिलोमतः ठद्वयेनसमायुक्तोभद्रकालीमहामनुः ६ अथचंद्रिकाबीजानि मुंडमालातंत्रे भद्रिकाभास्व
तीभीमाभैंबीजत्रयमीरितम् ७ असत्यमपरंज्ञेयंब्रह्मवंशेकदीपकं प्रकाशम् क्रींक्रींक्रीं हूंहूं ह्रींह्रीं भैं भद्रका
लिभैंह्रींह्रींहूंहूंक्रींक्रींक्रींस्वाहा इतिमूलम् अथतुरीमंत्रोद्धारः स्वतंत्रे प्रणवंतारकाज्योतिः तमाद्यंतेनमद्
त्तितुर्यो मूलमिदंप्रोक्तंस्वतंत्रेशंभुनास्मृतम् ८ अथतारकादिबीजोद्धारः कामेश्वरतंत्रे अक्षभंतारकाज्योतिः

6A

तारबीजानिपंचच प्रकाशं ॐत्रोंत्रोंत्रौंमहातुर्यैनमः १० इतिमूलम् अथछिन्नामंत्रोद्धारः शिछन्नाशिरोम
णी अंबकः सकलापद्माचारुकंचसुरेश्वरि न्त्रेंत्रेउक्लूनबीजंचफट्द्वयेनसमापुतं ११ प्रकाशं ॐह्रींश्रींछ्रीं
च्छिन्नमस्तिकेफट्स्वाहा अथदक्षिणाकालीमंत्रोद्धारः उकंचश्यामारहस्ये कुंतीत्रयंतोरयुग्मं त्वमायुग्मंततो
भिधं १३ दक्षिणेकालिकेत्येवंचांतेकालीत्रयंपुनः कूलयुग्मंपरायुग्मंपयःश्चैवंसुरेश्वरि १४ दक्षिणाकालि
कामाख्यहनुद्वाविंशदक्षरः प्रकाशं क्रींक्रींक्रींहूंहूंह्रींह्रींदक्षिणेकालिकेक्रींक्रींक्रींहूंहूंह्रींह्रींस्वाहा इति
मूलम् अथश्यामामंत्रोद्धारः श्यामातंत्रे हरिणालोलतालसज्ञाकालोजि ह्वाचतुष्टयं १६ ततःसुधारसेश्या
मेकृष्णशापंविमोचय ॥ अमृतंस्रावयस्वाहा श्यामातंत्रमुदाहृतम् १७ प्रकाशम्० श्रींह्रींक्रांक्रींक्रेंक्रौं
क्रःसुधारसेश्यामेकृष्णशापंविमोचयामृतंस्रावयस्वाहा इतिमूलम् अथकालरात्रीमंत्रोद्धारः कालरात्रीक
ल्पे प्रणवंवासनामायामन्मथःकमलोद्भवमितिदोषः १८ मन्मथःकमलातथा बीजंपंचशिरोऐज्ञेयं ततः
पल्लवमुद्धरेत् ततोमध्येभिधंस्यत्कांततःसर्ववशंकुरु २० कुरुनीरंदेहियुग्मंमध्येस्यत्काभिधंततः ॥:

बी० ६

गणेश्वर्येंतथाचांतेविश्वेदेविसमास्त्वयेत प्रकाशं ॐ ऐं ह्रीं क्लीं श्रीं काहेश्वरिसर्वजनंमनोहरिसर्वमुखस्तंभिनि
सर्वराजवसंकरिसर्वदुष्टनिर्दलिनिसर्वस्त्रीपुरुषाकर्षिणिवधीशृंखलास्त्रोटयत्रोटयसर्वशत्रूनभंजयभंजय
द्वेषीन्निर्दलयनिर्दलयसर्वान्स्तंभयस्तंभयमोहनास्त्रेणद्वेषिणमुच्चाटयउच्चाटयसर्वंवशीकुरुकुरुस्वाहा दे
हिदेहिसर्वंकालरात्रिकामिनिगणेश्वर्यैनमः २४ श्रीभैरवः देवेशित्रिपुराभालंविज्ञेयंद्वादशात्मकं वक्ष्यामिभ
वतांभीस्याश्रृणुध्वंमुनयोरहः २५ उक्तंचमुंडमालातंत्रे० त्रिपुरामंत्रराजंतुविज्ञेयंद्वादशात्मकं केवलंसकयेदे
विसर्वदागोपयेत्सदा २६ उक्तंचोड्डामरतंत्रे अष्टादशात्मिकाज्ञेयाविद्याश्रीषोडशाक्षरी परंयत्नसूचितंदे
विसद्योसुक्तिप्रदंस्मृतं २७ उक्तंचत्रिपुराशिरोमणौ० अष्टात्मकमिदंबीजंत्रिपुरायाःस्मृतंमया अष्टभि
र्वत्सरैर्देविमासैरष्टभिरेवच २८ अष्टभिर्दिवसैर्वापिजानियाद्रोगलक्षणं लक्ष्मीभेदद्वयंज्ञेयंभाषितंहृति
वाससा २९ लक्ष्मीश्चरुक्मिणीश्चेवत्रिभिर्वर्षैःफलंलभेत० ३० अथसरस्वतीभेदानि उक्तंचकामिनीकल्पे०
वाग्देवीचतथावाणीसरस्वत्य नलप्रिया ३१ भेदान्येतानिख्यातानिफलंवर्षचतुष्टये ततस्ताराभेदानि उक्तंच

7A

वामकेश्वरे तारापितारिणी चैव मेकजटा तथैव च ३१ नीलसरस्वती चैव सुग्रतारा प्रकीर्तिता ताराभेदानि पंचैवम
स्तोभ्येवेति भाषितं ३२ अथ भुवनेश्वरीभेदानि उक्तं च भैरवतंत्रे० भैरवी भीमरूपा च भीमा पि भुवनेश्वरी भक्त्याफल
प्रदा देवि नित्यं वर्षचतुष्टये ३३ अथ मातंगीभेदानि० उक्तं च विश्वसारतंत्रे शारिका पित्तया वर्णा फलदापि हि
वर्षिके ३४ ततो राज्ञीभेदानि राज्ञाभेदद्वयं प्रोक्तं सर्णी च स्वर्गगामिनी द्विवर्षमध्ये राज्ञो च भक्त्या राज्यं प्रयच्छति ३६
भीडाभेद विहीना च प्रज्ञा भाग्य विवर्द्धिनी इति कुलार्णवे अथ ज्वालामुखीभेदानि० उक्तं च ज्वालाशिरोमणौ ॥ ॥
आदौ ज्वालामुखी चैव मंबिका भगरूपिणी यथेष्टं फलं प्रोक्तं ज्वालाभेदत्रयं शिवे ३८ एतासां दशविद्यानां नाना
भेदक्रमः स्मृतः ततस्त्रिपुरातिलके त्रिपुराभेदानि त्रिपुराभैरवी विद्या हिंगुला चंडिका तथा चामुंडा नारसिंही
च चैंद्री हैमवतीश्वरी ४० मृडानी वारुणी दुर्गा महात्रिपुरसुंदरी देव्या द्वादशभेदानि प्रोक्तान्येतानि शूलिना ॥
४१ प्रकाशं श्रीं ह्रीं सौः त्रिपुरी च वर्म वसनं कामः शरद्रैरवि ऐं ह्रीं श्रीं नारसिंहि तथा चैंद्रि वारुणमेव ह्रीं च मदनः का
मं परा हक्लिन्नौं देवी हैमवतीश्वरी च कमला लज्जा तथा मन्मथ चन्द्रो वारुणि वाकु ईइल परा दुर्गस्य तां शंभुना श्रीं ह्रीं

वी॰को॰ क्लींवरणंशारदपितथाऽन्यत्स्तंपराःरुक्मिणी विद्याश्री विपरीतभावसहिताः श्रीषोडशात्माविधिः ४४ इतिषोड
७ शान्तरीभेदानि श्रीदेव्युवाच॰ महेश्वरत्रिकालज्ञशरणागतवत्सल भेदैर्युतानांदेवीनांमनूंस्त्वंवक्तुमर्हसि ४५
ईश्वरउ॰ दययातवदेवेशितद्वदामिसमासतः यदुक्तंभैरवतंत्रे अथाश्रियः ॐह्रींश्रींहरिणाक्ष्यावीजद्व
यंफलदंसदाः अंतंह्रींशक्तिनोरमंतेप्रोक्तमयिधूर्यदिना ४७ अथरुक्मिण्याः ॐह्रींचैवंतुरुक्मिण्यास्तारं
लक्ष्मीमयस्तथा अंतेप्रोक्तंमहेशानीलक्ष्म्याःभेदद्वयंस्मृतं ४८ प्रकाशं ॐह्रींश्रींलक्ष्मिर्ह्रींसःस्वाहा ॐह्रीं
रुक्मिणीॐश्रींस्वाहा॰ अथसरस्वतीभेदानि तारमापरावाग्भवमेवस्मा मातारंचलज्जीःपरमेश्वरेण वाग्देवतायाः
फलदंहिवालंनूनंनमोभक्तिपरायणानां ४९ अथवाण्याः तारंलज्जोऽहंवीजंचह्यंतेस्तंभमुदाहृतम् ॐह्रींऐंवाण्यैनमः राम॰
इतिमूलं चार्थंयपिविभूतिश्चऽन्यत्सरस्वत्यैततः ५० नमोऽन्तेपरमेशानिमयाप्रोक्तंनगात्मजे अथानलप्रि ७
यामूलं तारंलज्जावाग्भवंचमध्येऽनलप्रियेततः अक्षंविश्वंतथाचान्तेपर्वतेश्वरनन्दिनि ५१ देव्याश्चवारि

8A

भेदानिसरस्वत्यावरानने अथतारभेदानि॰ प्रकाशम् ॐऐंहूंतारेफट्स्वाहा ॐस्त्रीं ऐंहुंएकजटेफट्स्वाहा ॐह्रीं
ऐंहूंनीलसरस्वतिफट्स्वाहा ॐह्रींस्त्रींह्रींऐंहूंउग्रतारेफट्स्वाहा इतितारभेदानि अथभुवनेश्वरीभेदाः ॐभैर
व्यैनमः ॐह्रींभीमरूपायैनमः ॐश्रींभीमायैनमः इतिमूलं ॐह्रींश्रींक्लींभुवनेश्वर्यैनमः अथषाडंगीभे
दानि चक्रिण्याः ॐक्लींक्रींमहाचक्रीणिऐंठःस्वाहा ततःकुब्जिकायाः ॐश्रींप्रोंकुब्जिकेदेविह्रींठःस्वाहा ॥
अथशांभरीमंत्रः ॥ ॐश्रींदेविशांभरिक्लींठःस्वाहा इतिमूलं अथशारिकामंत्रः ॐह्रंभुंश्रांश्रेंदेव्यैअपर्णायैनमः
अथहैमवतीश्वरीमूलं ॐह्रींश्रींहैमवतीश्वरिह्रींस्वाहा अथभीडाभेदविहीनेत्सलम् अथांबिकामूलं ॥
ॐह्रींमातरंबिकेहुंफट्स्वाहा इतिमूलं एतानिभेदमंत्राणिमहाप्रोक्तानिपार्वति एतासांदशविद्यानां अन्या
सांशृणुवच्म्यहं ५७ भद्रकालीयथादेवीदक्षिणाकालिकातथा तुरीचैतामयास्याताभेदहीनामहेश्वरि ५८
अथछिन्नमस्तिकाद्विधा ॐह्रींश्रींछिन्नमस्तिकेक्लींफट्स्वाहा द्वितीयोयथा श्रींह्रींह्रींऐंवज्रवैरोचिनिह्रीं
फट्स्वाहा इतिमूलम् दक्षिणाकालिकाश्यामाकालरात्रीतिसुंदरि ५९ एताभेदविहीनाश्चयथाकामफ।

९

बी॰को॰ लप्रदाः ॥ इतिदक्षिणामूर्त्तिमुनिविरचितेउद्धारकोशतंत्रे सर्वागमसारे दशविद्याषट्देवीमंत्रोद्धारकोशभेद
८ देवीमंत्रोद्धारसूचकोनामद्वितीयःकल्पः २ ॥ भैरवः ॥ ततोदेविप्रवक्ष्यामिदेवीनांमंत्रमुत्तमं शृणुष्वैकमना
भूत्वायेनसिद्धिर्भवेद्ध्रुवम् १ दक्षिणामूर्त्तिनातस्मिन्कालेतेवासिनेतदा यत्सूचितेमहादेवितद्वक्ष्याभिसमासतः
२ तस्मिन्कालेमुनेस्तस्यमुनिसेवितमाश्रमं ॥ आययुर्मुनयस्सर्वेमन्त्रिणश्चसमुत्सुकाः ३ लोहितोहालकौ
शांवमातंगौपुंडरीकजौ शांडिल्यगालवौवत्सस्याश्रमपदंययुः ४ सर्वेमिलित्वामुनिपुंगवंतेश्री दक्षिणा
मूर्तिमिदंसमूचुः स्वकीयदेवेष्टमनूनमगृहनुपप्रच्छुराद्यपरमेशमूलं दक्षिणामूर्तिरुवाच शृणुध्वंमुनयःसर्वेवक्ष्या
म्याश्चर्यमुत्तमं चराचरेस्मिन्जगतिदेविसीमंतशेखरा नतादृशीक्वचित्योक्तायथात्रिपुरसुंदरी ६ तस्यामुखाम्बु राम॰
जात्सन्नदेव्याविद्यामयाश्रुताः ॥ पंचेष्टफलदाभक्त्यासर्वरोगभयापहाः ७ अचिरेणैवकालेनफलदास्साध्यमंत्रि ८
णां ऋषयऊचुः कास्त्वयाकानिनामानिकीदृशामनवस्तथा॰ श्रोतुमिच्छामहेत्वन्नोवक्तुमर्हसिनःप्रभो ८ ॥
दक्षिणामूर्त्तिः शृणुध्वमृषयःसम्यक्सर्वागमरहस्यकं ९ येनश्रवणमात्रेणहयमेधफलंलभेत् ईश्वरउ॰

9A

मुनीश्वरान् मनून् देवो दक्षिणामूर्त्तिरब्रवीत् १० सप्तविद्यायुगप्रोक्ता वज्रयोगिन्यादिदेवताः तासां नामानि वक्ष्यामि पर्वतेश्वरनंदिनि ११ दक्षिणामूर्त्तिनोदेवि प्रकाशितानि तत्वतः श्रीवज्रयोगिनी देवी वाराहीशारदा तथा कामेश्वरी तथा गौरी ह्यन्नपूर्णा तथैव च १२ कुलवागीश्वरी चैताः सप्तदेव्याः श्रुतामया दक्षिणामूर्त्तिना तेषां सप्तदेव्याः प्रकीर्त्तिताः १३ एतासां वलमाश्रित्य देवी त्रिपुरसुंदरी सस्रजे जगदेतच्च पालयते पि सुरेश्वरि ॥ हरते पि तथा विश्वं चराचरसमन्वितं ऋषिः एतद्वाक्यामृतं तस्या मुखांभोजाच्छ्रुतं मया १५ तासां मंत्रं प्रवक्ष्यामि शृणुध्वं मुनिपुंगवाः ॥ अथ मंत्रोद्धारः उक्तं च स्वतन्त्रे प्रणवं सकला चैव बीजो ह्रीं फट्‌ दायको ॥ मध्येपि वज्रयोगिन्यै ह्यंते नीरमुदाहृतम् १६ प्रकाशं ॐ ह्रीं वज्रयोगिन्यै स्वाहा अथ वाराहीमंत्रोद्धारः उक्तं च त्रिपुरातिलके वासना चैव वाह्लीकं नमो बीजसमन्वितम् वाग्भवं चौश्मकं चैव ततः पल्लवमुद्धरेत् १७ ढग वतिच वार्तालितततो वाराहि देवते वाराहि मुखे चैव वासनां च मठं तथा १८ ततः पंकजपयोजोहरं नीरं महेश्वरि वाराहि मगवत्याश्च ह्यष्टविंशाक्षरो मनुः १९ अथ वाह्लीकबीजोद्धाराणि २० मुंडमालातंत्रे वाह्लीकं नवसंज्ञं

बी॰को॰ ९ चहिंगुबीजंसुरेश्वरि ग्लौंबीजोद्धारमेतद्धि चान्यदन्नमीरितं २१ अथतमोबीजोद्धारः स्वतंत्रे तमोबीजंतथाध्वां
तंमोहंतिमिरमेवच लंबीजोद्धारमेतद्धि कृतिमंचान्यदीश्वरि २२ प्रकाशं ऐंग्लौंलंऐंनमोभगवतिवार्तालिवाराहि
देवतेवराहमुखिऐंग्लौंठःठःस्वाहा इतिवाराहीमूलम् अथशारदामंत्रोद्धारः शारदापटले तारंमायांचमद
नंशरद्धिज्ञेयमीश्मकं मंत्रंचषट्छिरोज्ञेयंततःपल्लवमुद्धरेत् २३ भगवत्यैशारदायैचांतेलज्जाचठद्वयं
इत्युद्धारः प्रकाशने ॐह्रींक्लिंसःनमोभगवत्यैशारदायैह्रींस्वाहा इतिशारदामूलं अथकामेश्वरीमंत्रोद्धारः॥
मायांचहरिणाक्षीचचंद्रःशीतांशुरेवच मदनश्चोर्मिध्वांतोह्रौंसंयोज्यसप्तबीजकम् २४ मनुःसप्तशिरोज्ञेयस्त
तःपल्लवमुद्धरेत् जंवनाख्यंततोदेविकामेश्वरितथैवच २५ ततोवाणदेवतेपिचांतेनीरमुदाहृतम् कामेश्व
र्यामहादेव्याद्वाविंशत्यक्षरोमनुः चंद्रस्यबीजोद्धा ऐन्द्रा अथचंद्रबीजोद्धारः ठकंचकालीसर्वस्व चन्द्रः ॥ राम॰
शीतांशुरिंदुश्चशर्वरीपतिरेवच २६ ताराधिपःसुधारश्मिःकृत्रिमाण्यपराणिच अथोर्मिबीजोद्धारः अस्मिं। ९
स्तन्त्रे ऊर्मिर्वीचिस्तथाचैवंतरंगश्चितयंतया २७ वंबीजोद्धारमेतद्धिपरंबीजंतुकृत्रिमं अथध्वांतबीजोद्धारः॥

101

युगमालंकरणे स्तनवीजंकुचंचैवसुरेजंहस्त्रमेवच २८ जंवीजान्येवमेतानि कृत्रिमाणपपराणिच प्रकाशं ह्रींश्रीं
क्रूंक्लींल्क्लीं ह्लुंजंजंवनारण्ये कामेश्वरिवाणदेवते स्वाहा इतिमूलं इतिभैरवपटले अथगौरीमंत्रोद्धारः उक्तंचत्रि
पुरशिरोमणौ प्रणवंकमलांचैवमायावाह्नीकमेवच शिववीजंतथादेविगौरीशार्वेश्चठद्वयम् २९ भगवत्यामहा
गौर्यावालः श्रीषोडशाक्षरः अथशिववीजोद्धारः कुलचूडामणौ शिववीजंचशंभुश्चशर्वःशंकरएवच गंवीजा
निचत्वारिकृत्रिमाण्यपराणिच ३० ॐह्रींश्रींह्रींग्लौंगंगौरिगींस्वाहा इतिमूलं अथान्नपूर्णमंत्रः उक्तंच॰
कामेश्वरतंत्रे तारंपरापिकमलामीनकेतनएवच विश्वंततोभगवतिमाहेश्वरिततःपुनः ३१ अन्नपूर्णेठद्व
यंचमनुर्विंशाक्षरःस्मृतः मीनकेतनइतिशेषः उक्तंचत्रिपुरसुंदरीसर्वस्वे अद्यंमायापिपद्माचकामंवि
श्वमुदाहृतम् बीजंतुषट्कस्वरोक्तंयंततःपल्लवमुद्धरेत विश्वेनसहदेवेशीमूलशीर्षंष्षडक्षरः प्रकाशं ॐह्रींश्रीं
क्लींनमोभगवतीमाहेश्वरि अन्नपूर्णेस्वाहा० अथकुलवागीश्वरीमंत्रोद्धारः उक्तंचमुंडमालातंत्रे प्रणवं
मदनंचैवस्कंदंनारायणप्रिया ३२ ततमिच्छान्नरंचैवततः पल्लवमुद्धरेत उपहस्ततःपश्चात्कुलवागीश्व

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com